॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ७८

स हताश्वो महातेजा भूमौ तिष्ठन्निशाचरः ।
इन्द्रजित्परमक्रुद्धः सम्प्रजज्वाल तेजसा ॥१॥

तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम् ।
विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव ॥२॥

निबर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः ।
भर्तारं न जहुर्युद्धे सम्पतन्तस्ततस्ततः ॥३॥

स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः ।
ववर्ष शरवर्षाणि वर्षाणीव पुरन्दरः ॥४॥

मुक्तमिन्द्रजिता तत्तु शरवर्षमरिन्दमः ।
अवारयदसम्भ्रान्तो लक्ष्मणः सुदुरासदम् ॥५॥

अभेद्यकचनं मत्वा लक्ष्मणं रावणात्मजः ।
ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित् ।
अविध्यत्परमक्रुद्धः शीघ्रमस्त्रं प्रदर्शयन् ॥६॥

तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः ।
रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः ॥७॥

स तथाप्यर्दितो बाणै राक्षसेन महामृधे ।
तमाशु प्रतिविव्याध लक्ष्मणः पनभिः शरैः ॥८॥

लक्ष्मणेन्द्रजितौ वीरौ महाबलशरासनौ ।
अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीमविक्रमौ ॥९॥

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ ।
घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ॥१०॥

तस्मै दृढतरं क्रुद्धो हताश्वाय विभीषणः ।
वज्रस्पर्शसमान्पञ्च ससर्जोरसि मार्गणान् ॥११॥

ते तस्य कायं निर्भिद्य रुक्मपुङ्खा निमित्तगाः ।
बभूवुर्लोहितादिग्धा रक्टा इव महोरगाः ॥१२॥

स पितृव्यस्य सङ्क्रुद्ध इन्द्रजिच्छरमाददे ।
उत्तमं रक्षसां मध्ये यमदत्तं महाबलः ॥१३॥

तं समीक्ष्य महातेजा महेषुं तेन संहितम् ।
लक्ष्मणोऽप्याददे बाणमन्यं भीमपराक्रमः ॥१४॥

कुबेरेण स्वयं स्वप्ने यद्दत्तममितात्मना ।
दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः ॥१५॥

ताभ्यां तौ धनुषि श्रेष्ठे संहितौ सायकोत्तमौ ।
विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया ॥१६॥

तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ ।
मुखेन मुखमाहत्य संनिपेततुरोजसा ॥१७॥

तौ महाग्रहसङ्काशावन्योन्यं संनिपत्य च ।
सङ्ग्रामे शतधा यातौ मेदिन्यां विनिपेततुः ॥१८॥

शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि ।
व्रीडितो जातरोषौ च लक्ष्मणेन्द्रजितावुभौ ॥१९॥

सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे ।
रौद्रं महेद्रजिद्युद्धे व्यसृजद्युधि विष्ठितः ॥२०॥

तयोः सुतुमुलं युद्धं सम्बभूवाद्भुतोपमम् ।
गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् ॥२१॥

भैरवाभिरुते भीमे युद्धे वानरराक्षसाम् ।
भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ॥२२॥

ऋषयः पितरो देवा गन्धर्वा गरुणोरगाः ।
शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ॥२३॥

अथान्यं मार्गणश्रेष्ठं सन्दधे रावणानुजः ।
हुताशनसमस्पर्शं रावणात्मजदारुणम् ॥२४॥

सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् ।
सुवर्णविकृतं वीरः शरीरान्तकरं शरम् ॥२५॥

दुरावारं दुर्विषहं राक्षसानां भयावहम् ।

आशीविषविषप्रख्यं देवसङ्घैः समर्चितम् ॥ २६ ॥

येन शक्रो महातेजा दानवानजयत्प्रभुः ।
पुरा देवासुरे युद्धे वीर्यवान्हरिवाहनः ॥ २७ ॥

तदैन्द्रमस्त्रं सौमित्रिः संयुगेष्वपराजितम् ।
शरश्रेष्ठं धनुः श्रेष्ठे नरश्रेष्ठोऽभिसन्दधे ॥ २८ ॥

सन्धायामित्रदलनं विचकर्ष शरासनम् ।
सज्यमायम्य दुर्धर्षः कालो लोकक्षये यथा ॥ २९ ॥

सन्धाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत् ।
लक्ष्मीवाँल्लक्ष्मणो वाक्यमर्थसाधकमात्मनः ॥ ३० ॥

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।
पौरुषे चाप्रतिद्वन्द्वस्तदेनं जहि रावणिम् ॥ ३१ ॥

इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम् ।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ।
ऐन्द्रास्त्रेण समायुज्य लक्ष्मणः परवीरहा ॥ ३२ ॥

तच्छिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् ।
प्रमथ्येन्द्रजितः कायात्पपात धरणीतले ॥ ३३ ॥

तद्राक्षसतनूजस्य छिन्नस्कन्धं शिरो महत् ।
तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम् ॥ ३४ ॥

हतस्तु निपपाताशु धरण्यां रावणात्मजः ।
कवची सशिरस्त्राणो विध्वस्तः सशरासनः ॥ ३५ ॥

चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः ।
हृष्यन्तो निहते तस्मिन्देवा वृत्रवधे यथा ॥ ३६ ॥

अथान्तरिक्षे भूतानामृषीणां च महात्मनाम् ।
अभिजज्ञे च संनादो गन्धर्वाप्सरसाम् अपि ॥ ३७ ॥

पतितं समभिज्ञाय राक्षसी सा महाचमूः ।
वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः ॥ ३८ ॥

वनरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः ।
लङ्कामभिमुखाः सर्वे नष्टसंज्ञाः प्रधाविताः ॥ ३९ ॥

दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः ।
त्यक्त्वा प्रहरणान्सर्वे पट्टसासिपरश्वधान् ॥ ४० ॥

के चिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः ।
समुद्रे पतिताः के चित्के चित्पर्वतमाश्रिताः ॥ ४१ ॥

हतमिन्द्रजितं दृष्ट्वा शयानं समरक्षितौ ।
राक्षसानां सहस्रेषु न कश्चित्प्रत्यदृश्यत ॥ ४२ ॥

यथास्तं गत आदित्ये नावतिष्ठन्ति रश्मयः ।
तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः ॥ ४३ ॥

शान्तरश्मिरिवादित्यो निर्वाण इव पावकः ।
स बभूव महातेजा व्यपास्त गतजीवितः ॥ ४४ ॥

प्रशान्तपीडा बहुलो विनष्टारिः प्रहर्षवान् ।
बभूव लोकः पतिते राक्षसेन्द्रसुते तदा ॥ ४५ ॥

हर्षं च शक्रो भगवान्सह सर्वैः सुरर्षभैः ।
जगाम निहते तस्मिन्राक्षसे पापकर्मणि ॥ ४६ ॥

शुद्धा आपो नभश्चैव जहृषुर्दैत्यदानवाः ।
आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे ॥ ४७ ॥

ऊचुश्च सहिताः सर्वे देवगन्धर्वदानवाः ।
विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति ॥ ४८ ॥

ततोऽभ्यनन्दन्संहृष्टाः समरे हरियूथपाः ।
तमप्रतिबलं दृष्ट्वा हतं नैरृतपुङ्गवम् ॥ ४९ ॥

विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः ।
विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम् ॥ ५० ॥

क्ष्वेडन्तश्च नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥ ५१ ॥

लाङ्गूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः ।
लक्ष्मणो जयतीत्येवं वाक्यं व्यश्रावयंस्तदा ॥ ५२ ॥

अन्योन्यं च समाश्लिष्य कपयो हृष्टमानसाः ।
चक्रुरुच्चावचगुणा राघवाश्रयजाः कथाः ॥ ५३ ॥

तदसुकरमथाभिवीक्ष्य हृष्टाः
प्रियसुहृदो युधि लक्ष्मणस्य कर्म ।
परममुपलभन्मनःप्रहर्षं
विनिहतमिन्द्ररिपुं निशम्य देवाः ॥ ५४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com